## एकविंशः पाठः

# सूक्तयः

(1) आचारः परमो धर्मः।

(2) संसर्गजाः दोषगुणाः भवन्ति।

(3) उदारचरितानां तु वसुधैव कुटुम्बकम्।

(4) हितं मनोहारि च दुर्लभं वचः।

(5) उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।

(6) अति सर्वत्र वर्जयेत्।

(7) विनाशकाले विपरीतबुद्धिः।

(8) न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे।

(9) आत्मनः प्रतिकूलानि परेषां न समाचरेत्।

(10) क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।

### शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| उद्यमेन | = | परिश्रम से | संसर्गजाः | = | साथ रहने से |
| प्रदीप्ते | = | जलने पर | कूपखननं | = | कुआ खोदना |
| आत्मनः | = | अपने | क्षीयन्ते | = | नष्ट हो जाते हैं। |
| भूषणानि | = | गहने। | | | |

### अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) कः परमो धर्मः?

(ख) विपरीतबुद्धिः कदा भवति?

(ग) कूपखननं कदा न युक्तम्?

(घ) केन कार्याणि सिद्ध्यन्ति?

(ङ) किं सर्वत्र वर्जयेत्?

2. **एकवाक्येन उत्तरं लिखत–**

(क) कानि परेषां न समाचरेत्?

(ख) संसर्गजाः के भवन्ति?

(ग) सर्वोत्तमं भूषणं किम् अस्ति?

3. **रिक्तस्थानानि पूरयत–**

(क) ................ वसुधैव कुटुम्बकम्।

(ख) हितं मनोहारि च ................ वचः।

(ग) आत्मनः ................ परेषां न समाचरेत्।

(घ) न ................ युक्तं प्रदीप्ते वह्निना गृहे।

(ङ) विनाशकाले ................।

4. **उचितपदमेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | संसर्गजाः | विपरीतबुद्धिः। |
| (ख) | उदारचरितानां तु | वर्जयेत्। |
| (ग) | विनाशकाले | दोषगुणाः भवन्ति। |
| (घ) | आत्मनः प्रतिकूलानि | वसुधैव कुटुम्बकम्। |
| (ङ) | अति सर्वत्र | परेषां न समाचरेत्। |

5. **समानार्थकं शब्दं लिखत–**

वह्निना, युक्तं, उद्यमेन, वसुधा

6. **अधोलिखितानां पदानां विलोमपदानि पाठात् चित्वा लिखत–**

अनुदारचरितानाम्, अनुकूलानि, सुलभम्,
आलस्येन समृद्धिकाले।

**7. शुद्धवाक्यानां समक्षं 'आम्', अशुद्धवाक्यानां समक्षम् 'न' इति लिखत–**

| | |
|---|---|
| (क) संसर्गजाः दोषगुणाः न भवन्ति। | |
| (ख) आत्मनः प्रतिकूलानि परेषां समाचरेत्। | |
| (ग) वाग्भूषणं भूषणं न अस्ति। | |
| (घ) अति सर्वत्र न वर्जयेत्। | |
| (ङ) कार्याणि मनोरथैः सिद्ध्यन्ति। | |

**8. संस्कृतवाक्येषु प्रयोगं कुरुत–**

खलु

सततं

गृहे

बुद्धिः

**9. रेखाङ्कितपदम् आधृत्य प्रश्नानां निर्माणं कुरुत–**

(क) <u>अति</u> सर्वत्र वर्जयेत्।

(ख) <u>आचारः</u> परमो धर्मः।

(ग) <u>उद्यमेन</u> हि सिद्ध्यन्ति कार्याणि।

(घ) <u>उदारचरितानां तु</u> वसुधैव कुटुम्बकम्।

**योग्यताविस्तारः–**

- विविधभावैः युक्ताः सूक्तीः एकत्र सङ्कलय्य पठन्तु।

*शीलं परं भूषणम्।*